Aśoka

# Avayavinirākaraṇa

SARIT

SARIT

# Contents

Contents i

१ ॥ अवयविनिराकरणम् ॥ १

The TEI Header १

# १ ॥ अवयविनिराकरणम् ॥

1/tha78b/msR

॥ नमो लोकनाथाय ॥ §1

अभ्यासातिशयस्तथा न विहितस्तादृक् श्रुतं नार्जितं
तन्मे चापलमर्थलेशमधुना निर्मातुमीहे यदि ।
एतत् सर्वमवेक्ष्य यन्निगदितं तत् पण्डितैर्दृश्यतां
प्रीणन्त्येव विचेष्टितानि हि शिशोः प्रायः पितॄणां मनः ॥§5

यो विरुद्धधर्माध्यासवान् नासावेकः । यथा घटादिरर्थः । विरुद्धधर्माध्यासवांश्च स्थूलो नीलादिरर्थ इति व्यापकविरुद्धोपलब्धिः । इह दृश्यमानः स्थूलो नीलादिरर्थो धर्मी । स चानुभवावसितोऽसति बाधके प्रत्यक्षसिद्धो हेतोराश्रयासिद्धिं निहन्ति । §6

ननु भवद्भिरसन्नेवावयवी प्रतिज्ञाँयते, स कथं प्रत्यक्षसिद्धः ? नावयविनमिह धर्मिणं प्रतिपन्नाः स्मः, किं तु प्रतिभासमानं स्थूलनीलादिकमर्थम् । न तर्हि विरुद्धधर्मसंसर्गादवयविन एकत्वं प्रतिषिद्धं स्यात् । §7

यद्येवं कस्तर्हि भवतोऽवयवी ? एकोऽनेकावयवसमवेतोऽर्थ इति चेत् ? स किं प्रतिभासमानात् स्थूलनीलादेरन्योऽनन्यो वा ? न तावदन्यः, दृश्यत्वेनाभ्युपगमात् । न च प्रतिभासमानस्थूलनीलार्थव्यतिरेकेणापरः प्रतिभाति । अनन्यश्चेत् ? तस्यैकत्वप्रतिक्षेपे कथमप्रतिषिद्धमेकत्वमवयविनः ? §8

ननु च प्रतिभासमानश्चेदर्थो नावयविरूपो धर्मी, किं तर्हि रूपमस्याविशिष्टं प्रसिद्धं भविष्यतीति ? उच्यते । प्रतिभासमानः स्थूलो नीलाकारः प्रत्यक्षसिद्धं रूपम् अवयवित्वानभ्युपगमेऽप्यवशिष्यते । न चैवं मन्तव्यम् । न परमाणुसंचयवादिनां स्थूलाकारः कश्चिदर्थोऽस्ति, यः प्रसिद्धो धर्मी स्यादिति । अवयव्यनभ्युपगमेऽपि हि निरवयवानेकात्मकः स्थूलोऽर्थोऽभ्युपगम्यमानः केन निषिद्धः ? §9

2/tha

स्यान्मतम्, निरवयवाः परमाणवः कथं प्रत्यक्षे स्थूलेनाकारेणावभासेरन्, स्थूलसूक्ष्मयोर्विरोधादिति ? तदपि न युक्तम्, परमाणव एव हि पररूपदेशपरिहारेणोत्पन्नाः परस्परसहिता अवभासमाना देशवितानवन्तो भासन्ते । विततदेशत्वं च स्थूलत्वम् । §10

१ नाथाय ] नमः समन्तभद्राय avaya-S
५ विचेष्टितानि ] चेष्टितानि avaya-S
७ इह ] °मानस्थूलो avaya-S
१२ तिषिद्धं ] निषिद्धं avaya-S
१९ सिद्धं ] °स्यावशिष्टप्रसिद्धं avaya-S

यत् तूक्तम्, स्थूलसूक्ष्मयोर्विरोध इति, तत् किं पररूपदेशपरिहारवती निरवयवानामुत्पत्तिः, परस्परसहितानामेकविज्ञानावभासित्वं वाविरुद्धमिति वक्तुमध्यवसितम् । § 11

इदं चेदविरुद्धम्, स्थूलाकारः किं विरुद्धः ? अतएव निरवयवेषु बहुष्वेकस्मिन् विज्ञाने प्रतिभासमानेषु भवन् प्रतिभासकालभावी प्रतिभासधर्मः स्थूलाकारो न तु वास्तवः, प्रत्येकमभावात् । प्रतिभासात् प्राग् 79a/msR उर्ध्वं वा न तर्हि स्थूल इति चेत्--न, तदापि प्रतिभासयोग्यतासंभवात् । यदैव हि संचिता भवेयुः, तदैव प्रतिभासयोग्याः परमाणवः । यदा च प्रतिभासयोग्यास्तदा स्थूलाः । § 12

यस्त्वाह निरवयवेषु बहुषु प्रतिभासमानेष्ववश्यमन्तरेणापि प्रतिभासितव्यम् । अन्तरानवभासे परस्परविविक्ता एव नावभासिताः स्युः । विविक्तानवभासे चाणुमात्रकं पिण्डो भवेत् । न चान्तरमवभासमानमुत्पश्यामः । तदयं निरन्तर एक एव स्थूलो न निरवयवानेकात्मको भवितुमर्हति, अपि त्वेकः स्थूलात्मक एवेति । सोऽप्येवं वाच्यः । किं विजातीयपरमाण्वन्तरमन्तरम्, आहोस्वित् शून्याकाशयोगः ? तत्र शून्याकाशयोगस्तावदवस्तुतया नेन्द्रियप्रत्यक्षगोचरः, अर्थसामर्थ्यभाविनि तत्रार्थस्यैव प्रतिभासोपपत्तेः । विजातीयं त्विन्द्रियान्तरग्राह्यं कथमिन्द्रियान्तरज्ञाने अवभासेत, अविषयत्वात् ? तत्र केनान्तरेणावभासितव्यमिति न विद्मः । § 13

यत् पुनरुच्यते, अन्तरालानवभासे विविक्ता नावभासेरन्निति, तत्रापि किमेषामन्तरं विवेकः पररूपशून्यता वेति चिन्त्यम् । निरूपयन्तस्तु पररूपशून्यतामेव विवेकं वस्तूनां पश्यामः । पररूपशून्याश्चेमे भासमानाः कथं विविक्ता नावभासेरन्निति ? § 14

3/tha

ननु च न प्रत्येकं परमाणूनां स्थूलाकारः, ततः समुदितानामेष्टव्यः । यथा च नीलपरमाणूनां प्रत्येकमसंभवन् पीताकारो बहुष्वपि न दृश्यते, तथा प्रत्येकमसंभवन् स्थूलाकारः कथं बहुषु स्यादिति ? § 15

उक्तमत्र, अविरुद्धो निरवयवाणां स्थूलाकार इति । नीलविरुद्धस्तु पीताकारः । ततः पीतविरुद्धं नीलाकारं बिभ्राणेषु बहुष्वपि कथं पीताकारो भवेत् ? नैवं निरवयवत्वविरुद्धः स्थूलाकारः, यथोक्तन्यायात् । तदेवं प्रत्यक्षसिद्धः स्थूलोऽर्थ इह धर्मीति व्यवस्थितम् । § 16

तदेवं व्यवस्थिते धर्मिणि हेतोः सत्त्वमसत्त्वं वा निरूप्य तत्र पाण्यादावेकस्मिन् कम्पमाने स्थूलोऽर्थः सकम्पनिष्कम्पे रूपे युगपत् प्रतिपद्यमानः कथं विरुद्धधर्मसंसर्गवान् न स्यात् ? सकम्पनिष्कम्पयोर्हि रूपयोः परस्पराभावाव्यभिचारनिमित्तकोऽस्ति विरोधः । भावाभावयोरेव हि परस्प-

---

२ भासित्वं ] वा विरुद्धम् avaya-S
४ म् ] चेद् विरुद्धम् avaya-S
१३ न ] न *om* avaya-S
३० स्थिते ] तदेवमवस्थिते avaya-S
३० निरूप्य ] निरूप्यम् avaya-S

रपरिहारात्मको विरोधः । वस्तुनोस्तु तदभावाव्यभिचारेणैव । इह च स-
कम्पनिष्कम्पे रूपे गृह्णत् प्रत्यक्षमेव सामर्थ्यात् परस्पराभावं साधयति ।
व्यवहारयति तु निर्विशेषणैवानुपलब्धिः । § 17

स्यादेतत् । पाण्यादावेकस्मिन्नवयवे कम्पमाने नावयविनः कम्परूपम- 79b/msR
भ्युपेयम् । अवयव एव हि तदा क्रियावान् दृश्यते । न चेदं मन्तव्यम्,
अवयवे क्रियावति तदाधेयेनावयविनापि क्रियावता भवितव्यम्, यथा र-
थे चलति तदारुढोऽपि चलतीति । अवयवावयविकर्मणोर्भिन्ननिमित्तत्वात्,
निमित्तायौगपद्याच्च । § 18

यदा हि आत्मनः पाणिकम्पनेच्छा भवति, ततः प्रयत्नः, तदा प्रय-
त्नवदात्मपाणिसंयोगात् पाणौ क्रिया । यदा तु शरीरकम्पनार्थः प्रयत्न-
विशेष आत्मनो जायते, तदा तत्प्रयत्नवदात्मशरीरसंयोगात् शरीरे कर्मेति
निमित्तभेदः । अतो भिन्ननिमित्तयोरेकस्मिन् जाते कथं निमित्तान्तरप्रतिब-
द्धजन्मा तदभावे तदपरोऽपि तथैव जायेत ? रथतदारुढकर्मणोस्तु सत्यपि
निमित्तभेदे निमित्तयौगपद्यात् सहभावः । § 19

तथा हि नोदनं रथकर्मणीऽसमवायिकारणम्, तदारुढकर्मणस्तु नोद्य-
संयोगः । तयोश्च सहभावात् कर्मणी अपि यौगपद्येन जायेते । तदेतत्
सकलमालोच्य <u>भदन्तधर्मोत्तरेण</u> इदमुक्तम्--न चात्रावयवः क्रियावान् । 4/tha
अवयवेषु हि क्रियावस्तु विभागो जायते, क्रियाया विभागारम्भं प्रति निर-
पेक्षकारणत्वात् । तेन च संयोगेऽसमवायिकारणे निवर्तिते निवर्ततावयविद्र-
व्यमिति । § 20

इदमाहुरत्र <u>कणादशिष्याः</u>--नोदनादभिघाताद् वा जायमानः क्रियाविशेषो
द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागारम्भको दृष्टः । अन्यत् तु विभागमात्र-
मारभते, न तु यथोक्तविशेषम् । अन्यस्मिन् पद्मसंकोचविकाशादिके क-
र्मणि अवयवसंयोगनिवृत्तेरदर्शनात् । तद्वत् प्रयत्नजन्यस्यापि कर्मणो नास्ति
संयोगनिवर्तनसामर्थ्यम् । ततो नास्ति द्रव्यनिवृत्तिरिति । § 21

अयमत्र समाधिः । इहावयविनि क्रियावति नियमेनावयवैरपि क्रियाव-
द्भिर्भवितव्यम् । अन्यथावयवसंसृष्टेभ्य आकाशदेशेभ्यो विभागोऽवय-
वासंसृष्टैश्च संयोगोऽवयविनः क्रियावतः स्यात् । अवयवास्तु क्रियाविरहिणः
पूर्वाक्रान्तेभ्यो नभोदेशेभ्यो नापसर्पेयुः । अवयविसमाक्रान्तैश्च देशैर्नाभिसंब-
ध्येरन् । § 22

न चावयविसंयोगविभागाभ्यामवयवसंयोगविभागौ वाच्यौ, कार्यसंयोग-
विभागयोः कारणसंयोगविभागौ प्रति निमित्तभावानभ्युपगमात् । कारण-
संयोगविभागावेव हि कार्यसंयोगविभागावारभेते । § 23

न च विपर्ययः, सिद्धान्तहानिप्रसङ्गात् । तेनावयवावयविनां पृथग्देशत्वात्
आधार्याधारभावहानौ समवायोऽपि न व्यवतिष्ठेत । तस्माद् अवयविनि 80a/msR

---

१२ अतो] भिन्नमिति तयोः avaya-S
१९ णे] निवर्तते avaya-S
२१ भिघाताद्] °दविघाताद्वा avaya-msR

क्रियावति अवयवाः क्रियावन्तः इत्यकामकैरपि वैशेषिकैः इदमभ्युपेयम् । यथा चावयविक्रियायामवयवाः क्रियावन्तः, तथा अवयवेष्वपि क्रियावत्सु तदवयवैः क्रियावद्भिर्भाव्यमिति । अनया दिशा द्व्यणुके क्रियावति तदारम्भकौ परमाणू क्रियावन्तौ मन्तव्यौ । § 24

अतश्चलावयवसंबन्धिनश्चलाः परमाणवः । निष्क्रियावयवसंबन्धिनस्तु निष्क्रियाः । परमाणुक्रियायां तदारब्धमपि द्व्यणुकद्रव्यं क्रियावत् प्रसज्येत, सर्वावयवक्रियायाः कार्यक्रियाविनाभूतत्वात् । § 25

5/tha

एकस्य परमाणोः क्रिया न परस्येति चेत् ? सक्रियनिष्क्रियौ तर्हि परमाणू परस्परं विभज्यमानावुज्झितद्रव्यारम्भकसंयोगौ स्याताम् । ततश्च द्रव्यनाशः । एवं च द्व्यणुकद्रव्यस्य क्रियावत्त्वे त्र्यणुकेऽपि क्रिया स्यादित्यनेन क्रमेण परिदृश्यमानोऽचलश्चलः स्यादवयवः । तस्मात् निष्क्रियावयवसंबन्धिनो निष्क्रियाः परमाणवः चलावयवसंबन्धिभ्यश्चलेभ्यो विभज्यमाना द्रव्यारम्भकसंयोगविनाशवन्तः स्युः । निरवयवो हि परमाणुर्यमणुमात्रनभोदेशमाक्रम्य परमाण्वन्तरेण संयुज्यते, ततो विभज्यमानः कथमनुज्झितपरमाण्वन्तरप्रत्यासत्तिकः स्यात् ? सावयवो हि भाव एकेनावयवेन वस्त्वन्तरसंयुक्त एवावयवान्तरैश्चलैः पूर्वाक्रान्तान् नभोदेशान् विरहय्य देशान्तरमाक्रामेत् । निरवयवेषु त्वत्यन्तमस्तमितेयं कथेति युक्तं द्रव्यनाशप्रसङ्गम् उत्पश्यामः । § 26

अथ वान्यथायं विरुद्धधर्मसंसर्गः । तथा ह्यावृते एकस्मिन् पाण्यादौ स्थूलस्यावृतानावृते रूपे युगपदुद्भवन्ती विरुद्धधर्मद्वयसंयोगमस्यावेदयतः । न चानावृतैकरूप एवायमिति शक्यं वक्तुम्, अर्द्धावरणेऽपि अनावृतस्य पूर्ववद् दर्शनप्रसङ्गात् । § 27

*तदवयवदर्शनायत्तोपलब्धेः तददृष्टावस्यादृष्टिरिति चेत् ? अदृष्टिरेव तर्हि अस्यास्तु, न तु दृष्टदृष्टी । § 28

नन्वस्त्येवावयविदर्शनमवयवावरणेऽपीति कोऽयं प्रसङ्गः ? एवं तर्हि स्थूलः प्राग्वदुपलभ्येत । § 29

इदमत्राह कश्चित् । भूयोऽवयवेन्द्रियसन्निकर्षसहायोऽवयवीन्द्रियसन्निकर्षः स्थूलोपलब्धेर्निमित्तम् । न चार्द्धावरणे भूयसामवयवानामस्तीन्द्रियसन्निकर्षः । ततो न स्थूलग्रहणमिति । § 30

सोऽप्येवं प्रष्टव्यः । किं स्थूलो नामावयविनोऽन्यः ? स ए[व] वा-
80b/msR नेकव्यापी स्थूलः ? तत्र यद्यवयव्येव स्थूलः, तदा तद्ग्रहणे कथं न स्थूलग्रहणमिति चिन्त्यम् । § 31

अथ स्थूलत्वाख्यः परिमाणविशेषो गुणः, *स च द्रव्यादन्य एवेति चेत् ?
6/tha एवं तर्हि परिमाणरहितमेतद् द्रव्यमुपलभ्यते । न त्वस्यान्येनान्येन परिमाणेन

२३ *] तत् *om* avaya-S
३३ *] स द्रव्या° avaya-S
३४ द्] °मेव तत् avaya-S

योगः । न चास्यानेकपरिमाणकल्पनापि साध्वी, युगपत् सर्वेषामनुपलब्धेः । न च दृश्यस्य दर्शननिवृत्तिर्युक्ता । § 32

अवयवस्यैव तत् परिमाणमुपलभ्यत इति चेत् ? यद्येवं स एव तर्हि अवयवः स्वेन परिमाणेन संबद्धः प्रत्यक्षोऽस्त्वावरणकाले नावयवी । § 33

स्यादेतत् । एकार्थसमवायाद् भ्रान्तिनिमित्तादवयव्येवावयवपरिमानेन संबद्धः प्रतिभातीति, तदपि न शोभनम् । द्वयोः समपरिमाणयोरवयवावयविनोः प्रतिभासप्रसङ्गः । यस्य हि महतोऽवयवस्य तत् परिमाणम्, स तावत् स्वेन परिमाणेन संबद्धः प्रतिभाति । अवयविनश्च तत्परिमाणसंबन्धप्रतिभासाभ्युपगमे द्वयोः समपरिमाणयोरवयवावयविनोः प्रतिभास आसज्यते । § 34

न चास्ति यथोक्तः प्रतिभासः । परिमाणरहितः सोऽवयवः प्रतिभासत इति चेत् ? स्यादेतत् । यस्यावयवस्य परिमाणेनावयवी संबद्धः प्रतिभाति स स्वं परिमाणं परित्यज्याभातीति । इदमपि परिमाणविरहिणोऽवयवस्यादृष्टेरशक्यं कल्पयितुम् । एकार्थसमवायाच्च भ्रान्तिनिमित्तादल्पतरावयवपरिमाणवानप्यवयवी प्रतिभासेत । न च बाधकमन्तरेण भ्रान्तिरपि शक्या व्यवस्थापयितुम् । § 35

अस्तु तर्हि स्थूलोऽवयव एव प्रत्यक्षः । *एवमावरणकाले इवानावरणावस्थायामपि स्थूलतरोऽवयवः प्रत्यक्षोऽस्तु, परमध्यवर्तिनामवयवानामिन्द्रियसन्निकर्षाभावे स्थूलतमावयविदर्शनानुपपत्तेः । स्यान्मतं निखिलावयवदर्शन न स्थूलप्रत्यक्षकारणम्, किं तु भूयोऽवयवदर्शनमिति । § 36

इदमपि न सम्यक् । अभिमुखावस्थितस्य हि पर्वतादेरर्वाचीनावयवदर्शने न तथा स्थूलप्रतिपत्तिः, यथा अर्वाक्परमध्यवर्तिनां दर्शने । ततो न यावत् निरवशेषावयवदर्शनम्, तावत् कथं स्थूलतमार्थप्रतिपत्तिः स्यात् ? न चावयवा अर्वाक्परमध्यवर्तिनो युगपद् दृश्यन्ते । तत् कथमवयवी स्थूलो दृश्येत ? § 37

क्रमेण दिशामवयवानां प्रत्यक्षीकरणे प्रत्यक्षः स्थूलोऽवयवीति चेत् ? अन्यदा तु कः प्रत्यक्ष इति विमृष्यम् । अवयव इति चेत् ? अवयवा *
अपि परमध्यवर्तिनो न युगपद् दृश्यन्त इति कथं सोऽपि प्रत्यक्षः स्यात् 7/tha
? तदेवं नावयवी नावयवाः प्रत्यक्षा इति न किञ्चिद् दृश्येतेति । तत् 81a/msR
सिद्धमावृतानावृतरूपः स्थूलोऽर्थ इति । § 38

तथा रागारागाभ्यां विरोधः संभावनीयः । तथा ह्येकस्मिन् रक्ते स्थूलोऽर्थो रक्तारक्ते रूपे युगपत् प्रतिपद्यमानो विरुद्धरूपद्वययोगमात्मनः प्रकाशयति । ननु अवयव एव रक्तोऽवयवी त्वरक्तैकरूप एवेति । यद्येवं

२ च] दर्शनस्य avaya-msR
१७ *] एवमनाव° avaya-msR
२८ *] प्रतिभास इति avaya-S
३२ स्मिन्] उक्ते avaya-S

रक्तेऽवयवेऽरक्तरूपोऽवयवी दृश्येत । न चैवम् । अथ वा रागद्रव्यसंयोगो हि रक्तत्वम् । अवयवस्य च रागद्रव्येण संयोगेऽवयविनोऽपि तेन भाव्यम्, अवश्यं हि कारणसंयोगिना कार्यमपि संयुज्यत इति समयात् । § 39

यस्त्वाह--रक्त एवावयवी । अस्ति हि कुङ्कुमारक्ते पटावयवे कुङ्कुमारक्तः पट इति प्रत्ययः । ततो रागद्रव्यसंयुक्त एवावयवीति तस्यापि वर्णान्तरानवभासः स्यादवयविनः । रागद्रव्यं हि प्रत्यासीदत् निजरूपं वस्तुनस्तिरोधत्ते । स्वेन च रूपेण द्रव्यं संबध्नाति । यथा रक्तोऽवयवः तिरोहितसहजरूपो रागद्रव्यसमवायिना रूपेण संबन्धी प्रतिभाति । अवयविन्यपि रागद्रव्यसंयोगिनि वर्णान्तरानवभासप्रसङ्गो दुर्वारः । तन्न रक्त एवावयवीति शक्यं वक्तुम् । § 40

अन्यस्तु संयोगस्याव्याप्यवृत्त्या समाधत्ते । स ह्याह, शब्द इवाव्याप्यवृत्तिः संयोगः । तेनैकार्थो रक्तश्चारक्तश्च । सोऽप्येवं पर्यनुयोज्यः, कथमव्याप्यवृत्तिः ? यदि हि स्वाश्रये समवेतो रूपादिवद् व्याप्यवृत्तिरेवायम्, असमवेतश्चावृत्तिरेवाप्यद्रव्येष्विव गन्धः । § 41

एकत्र संयोगस्य भावाभावाव्यापिनी वृत्तिरिति चेत् ? स्यादेतत् । यथा विरुद्धावपि रूपरसावेकमाश्रयेते, तथा संयोगस्याप्येकत्र भावाभावौ युगपत् स्याताम् । § 42

अहो मोहविजृम्भितम् । अभावो हि भावनिवृत्तिरूपः, नास्य भावनिवृत्तिं हित्वा रूपान्तरमीक्ष्यते । यश्च यन्निवृत्तिरूपः स कथं तस्मिन् सत्येव भवति, भावे वा तन्निवृत्तिरूपतां जह्यात् ? तथा हि अनलं पश्यन्नपि सलिलार्थी तत्र
8/tha प्रवर्तेत । जलविविक्तस्यानलस्य दर्शनात्, जलाभावसिद्धेः अप्रवृत्तिरिति चेत् ? भवतु अनुपलम्भात् जलाभावसिद्धिः, तथापि जलसत्तां संभावयन् जलार्थी प्रवर्तेत । § 43

ननु तत्र यदि जलं स्यात्, उपलभ्येत । किमतः ? अतोऽनुपलम्भाद् अभावो जलस्येति । यद्यप्यभ्युपगतैव जलाभावसिद्धिः, तथापि तदर्थिनस्तद्भावशङ्कया प्रवृत्तिः स्यात् । युगपदेकत्र संयोगस्य भावाभावौ दृश्येते । तेनैवं कल्पयामो न स्वेच्छया । § 44

ननु किमभावो भावप्रतिषेधात्मकः प्रतीयते, अन्यथा वा ? तत्र भाव-
81b/msR निवृत्तिरूपेऽभावे सिद्धे कथं भावोपलब्धिर्न भ्रान्ता स्यात् ? भावाप्रतिषेधात्मकश्च नाभावः । नाममात्रं तु स्यात् । न च नाममात्रादर्थस्य तथाभावः । रूपरसयोस्तु न परस्परनिवृत्ती रूपमिति कथं तदुदाहरणमिह शोभेत ? न च रूपरसयोरेकत्र समवायोऽस्माभिरनुमन्यते । शब्दोऽप्येवमेवाव्याप्यवृत्तिरसिद्धः । स कथं प्रकृतसंशयनिवृत्तये कल्प्येतेति ? अलं बहुलापितया । § 45

---

१५ भावाभावाव्यापिनी ] °व्यापिनो avaya-S

३३ या ] °भाषितया avaya-S

अथ वा स्थूलोऽर्थस्तदतद्देशः प्रतीयते । *तदतद्देशयोश्च परस्पराभावाव्यभिचारनिमित्तोऽस्ति विरोधः । अतो विरुद्धधर्मसंसर्गः स्थूलस्य । § 46

स्यादेतत् । कथं तदतद्देशयोः परस्पराभावाव्यभिचारः ? उच्यते, इह तावदेकस्मिन् देशे परिच्छिद्यमाने ताद्रूप्यप्रच्युतिरस्य व्यवच्छिद्यते, तदव्यवच्छेदे तत्परिच्छेदाभावप्रसक्तेः । प्रच्युतिवच्च प्रच्युतिमदपि देशान्तरं व्यवच्छिद्यते । यदि हि परिच्छिद्यमानो देशान्तरस्वभावो भवेत्, तदा तद्रूप एवोपलब्धो भवेत् । देशान्तररूपं तु विरहय्य स्वेन रूपेण प्रकाशमानो देशो देशान्तरासंसृष्ट इत्यवसीयते । यथा च देशस्य देशान्तरासंसर्गः, तथा तेनाधारभूतेन देशेन यद् व्याप्तं रूपं तदपि देशान्तरसंसर्गादवच्छिन्नं भवति । कथं हि तेन देशेन व्याप्तं रूपं तदभाववति देशान्तरे वर्तेत, यथा एकेन देशेन व्याप्तो घटो न देशान्तरे वर्तते ? § 47

देशान्तरेऽनुपलम्भादप्रवृत्तिरिति चेत् ? विप्रकृष्टे देशान्तरे कथमस्याभावः प्रतिपत्तव्यः ? तस्मादिदमकामकेनापि वाच्यम्, यदुत एकदेशव्याप्तं रूपं न देशान्तरे वर्तत इति, तस्य तेन व्यापनप्रसङ्गात् । § 48

9/tha

तदभावति देशान्तरे वर्तमानोऽपि तेन देशेन व्याप्येत । न च व्याप्तिरस्य शक्यावसातुम्, भागान्तरासंभवात् । § 49

एतेन तन्निरस्तं यदाह कश्चित्--यथैको भावस्तदतद्देशं जनयन्न विरुध्यत इति, तदपि न प्रकृतानुरूपम् । तथा हि भावाभावावेव परस्परपरिहारेण विरुद्धौ न वस्तुनी । वस्तुनोस्तु परस्पराभावाव्यभिचारेण विरोधः । तेन यदेव वस्तु वस्त्वन्तरप्रच्युतिमत्, तदेव तेन विरुद्धम् । § 50

न चैककार्यनिर्वर्तनशक्तिः कार्यान्तरशक्त्यभावाव्यभिचारिणी । अनुपलम्भो हि वस्तुनो वस्त्वन्तराभावाव्यभिचारं साधयति । एककार्यनिर्वर्तनशक्तिमति च रूपे गृह्यमाणे कार्यान्तरनिर्वर्त्तनशक्तिरपि परिच्छिद्यत इति कथं तदभावः ? एकदेशसंबद्धं तु रूपं देशान्तरसंसर्गिरूपपरिहारेणोपलभ्यमानं तदभावाव्यभिचारि तेन विरुद्धम् । यथात्यन्तसदृशोर्वस्तुनोर्युगपद् उपल- 82a/msR भ्यमानयोः सत्यपि चाकारभेदे दूरादनुपलक्ष्यमाणभेदयोर्देशभेदमात्रनिमित्तकं प्रत्यक्षावसितं विरोधमाश्रित्य भेदोऽवस्थाप्यते । § 51

यस्त्वाह--यथैकं चक्षुर्विज्ञ्ँआनं भिन्नेषु चक्षुरादिषु वर्तते तदधीनोत्पादतया, तथान्योऽपि भिन्नदेशनिवृत्तिर्न भेत्स्यत इति, सोऽपि देशभेदनिमित्ते विरोधे अवस्थाप्यमाने वस्तुनः कारणभेदनिमित्तं विरोधमासन्ँजयन् न

---

१ देशः ] तद्देशः avaya-msR
१ * ] °तद्देशयो° avaya-S
९ च्छिन्नं ] °दविच्छिन्नं avaya-S°द् विच्छिन्नं ?
१८ भावाभावावेव ] एव *om* avaya-msR
२५ मानं ] भाव्यचारितुं सच्च विरुद्धम् avaya-msR
२६ पि ] चाकाराभेदे avaya-msR
२७ सितं ] प्रत्यक्षाश्रितं avaya-msR
२९ थान्योऽपि ] देशवृत्ति° ?

नैपुण्यमात्मनो निवेदयति । न हि विज्ञ्ँआनस्य देशोऽस्ति कश्चित्, अमूर्तत्वात् । § 52

स्यादेतत् । यथा देशभेदनिमित्तो विरोधः, तथा कारणभेदनिमित्तोऽपि स्यात् । को हि वस्तुतो विशेषः कारणभेदाद् देशभेदस्येति ? § 53

उक्तमिह । परस्पराभावाव्यभिचारनिमित्तो वस्तूनामस्ति विरोधः । स देशभेदे संनिधीयते, न कारणभेदे । देशभेदवती हि रूपेऽन्योन्यपरिहारेणोपलभ्यमाने परस्पराभावाव्यभिचारिणी भवतो न कारणभेदवती । § 54

10/tha

तदेवं कम्परागावरणभावाभावकृते देशभेदनिबन्धने च चतुर्थे विरुद्धधर्मसंसर्गेऽवयविविषये व्यवस्थापिते पक्षधर्मत्वं सिद्धं हेतोः । अधुना व्याप्तिरेवास्य स्वसाध्येन समर्थनीया । § 55

इह विरुद्धधर्मसंसर्गविरहमात्रनिबन्धनोऽभेदव्यवहारो वस्तूनां दृष्टः अहेतोरयोगात्, निमित्तान्तरस्य चादर्शनात् । ततो विरुद्धधर्मसंसर्गेऽपि भवन्नभेदव्यवहारो व्यापकं निमित्तत्वं जह्यात् । ततो व्यापकानुपलब्ध्या तस्माद् व्यावृत्तो विरुद्धधर्मविरहेण व्याप्यते । तद्विरुद्धश्च विरुद्धधर्मसंसर्गः । तेनेयं व्यापकविरुद्धोपलब्धिभूमिका । § 56

एवं प्रसाधितेऽस्यास्त्रैरूप्येऽसिद्धविरुद्धानैकान्तिका दोषा नावकाशं लभन्त इति । § 57

एवं मया बहुषु दुर्मतिनिर्मितेषु
प्रत्युद्धृतेषु खलु दूषणकण्टकेषु ।
आचार्यनीतिपथ एव विशोधितोऽय-
मुत्सार्य मत्सरमनेन जनः प्रयातु ॥ § 61

॥ समाप्तं चेदमवयविनिराकरणमिति ॥

६ भेदे ] देशभेदेऽपि avaya-S
१३ कं ] निमित्तवत्त्वं avaya-S
१४ व्यावृत्तो ] तस्माद् व्या° *om* avaya-msR

# The TEI Header

```
  <teiHeader xmlns=”http://www.tei-c.org/ns/1.0” xml:lang=”en”>
<fileDesc>
  <titleStmt>
    <title>Avayavinirākaraṇa</title>
    <author>Aśoka</author>
    <funder>German Research Foundation (DFG); Project ”SARIT:
    ↪  Enriching Digital Text Collections in Indology” (Bilalteral Digital
    ↪  Humanities Programme DFG/NEH), 2013-2017</funder>
    <principal>
            <persName>Birgit Kellner</persName>
         </principal>
    <respStmt>
      <resp>data entry by</resp>
      <name key=”aurorachana”>Aurorachana, Auroville</name>
    </respStmt>
    <respStmt>
      <resp>prepared for SARIT by</resp>
      <persName xml:id=”sarit-encoder-avaya”>Liudmila
      ↪  Olalde</persName>
    </respStmt>
  </titleStmt>
  <editionStmt>
    <p> </p>
  </editionStmt>
  <publicationStmt>
    <publisher>”Project SARIT: Enriching Digital Text Collections in
    ↪  Indology” (Bilalteral Digital Humanities Programme
    ↪  DFG/NEH), 2013-2017.</publisher>
    <availability status=”restricted”>
      <p>Copyright Notice:</p>
      <p>Copyright 2016-2017 SARIT</p>
      <licence>
              <p>Distributed under a <ref
              ↪  target=”https://creativecommons.org/licenses/by-
              ↪  sa/4.0/”>Creative Commons Attribution-ShareAlike
              ↪  4.0 International licence.</ref> Under this licence, you
              ↪  are free to:</p>
              <list>
           <item>Share — copy and redistribute the material in any
           ↪  medium or format.</item>
           <item>Adapt — remix, transform, and build upon the
           ↪  material for any purpose, even commercially.</item>
         </list>
              <p>The licensor cannot revoke these freedoms as long as
              ↪  you follow the license terms.</p>
              <p>Under the following terms:</p>
              <list>
```

```
<item>Attribution — You must give appropriate credit,
↪ provide a link to the license, and indicate if changes were
↪ made. You may do so in any reasonable manner, but not
↪ in any way that suggests the licensor endorses you or your
↪ use.</item>
<item>ShareAlike — If you remix, transform, or build upon
↪ the material, you must distribute your contributions
↪ under the same license as the original.</item>
</list>
<p>More information and fuller details of this license are
↪ given on the Creative Commons website.</p>
</licence>
<p>SARIT assumes no responsibility for unauthorised use that
↪ infringes the rights of any copyright owners, known or
↪ unknown.</p>
</availability>
<date>2016</date>
</publicationStmt>
<sourceDesc>
<bibl xml:id="avaya-thakur-book">
<title type="main">Aśokanibandhau Avayavinirākaraṇaṃ
↪ Samānyadūṣaṇaṃ ca</title>
<author>Aśoka</author>
<editor xml:id="avaya-ed">Anantalal Thakur</editor>
<publisher>Kashi Prasad Jayaswal Research
↪ Institute</publisher>
<pubPlace>Patna</pubPlace>
<date>1974</date>
<note>The manuscript consulted by Thakur is described
↪ below.</note>
</bibl>
<listWit>
<witness xml:id="avaya-msR">
<msDesc>
<msIdentifier>
<idno>Ratnakīrtinibandha</idno>
<altIdentifier>
<idno>R</idno>
<note>This description is based on Thakur's introduction
↪ to his <ref target="#avaya-thakur-book">1974
↪ edition</ref> (pp. vii-viii).</note>
</altIdentifier>
</msIdentifier>
<msContents>
<msItem>
<author>Ratnakīrti</author>
<title>Ratnakīrtinibandha</title>
</msItem>
<msItem>
```

```
        <author>Aśoka</author>
        <title>Avayavinirākaraṇa</title>
      </msItem>
      <msItem>
        <author>Aśoka</author>
        <title>Sāmānyaduṣaṇa</title>
      </msItem>
    </msContents>
    <physDesc>
      <objectDesc>
        <p>Thakur had access only to photographs of the
        ↪ palm-leave manuscript.</p>
        <p>The <title>Avayavinirākaraṇa</title> covers folios
        ↪ 78b1-82a5. The <title>Sāmānyaduṣana</title>
        ↪ covers folios 82a5-84b1. Both texts are placed
        ↪ between the <title>Citrādvaitaprakāśavāda</title>
        ↪ and the <title>Santānāntaradūṣaṇa</title>. The
        ↪ scribe is the same as in the
        ↪ <title>Ratnakīrtinibandha</title>. Each side of a
        ↪ folio consists of six lines of ca. 138 syllables. The
        ↪ inner four lines leave a gap of 12 syllables for two
        ↪ perforations in the palm-leaves.  The script is
        ↪ proto-Maithili.</p>
      </objectDesc>
    </physDesc>
    <history>
      <p>Photographs of manuscripts brought by Rahula
      ↪ Sankrityayana from Tibet discovered by Anantalal
      ↪ Thakur while editing the
      ↪ <title>Ratnakīrtinibandhāvalī</title>.</p>
    </history>
  </msDesc>

     </witness>
 <witness xml:id="avaya-S">
         <bibl>
           <title>Six Buddhist Nyāya Tracts in Sanskrit</title>
           <editor>Mahāmahopadhyāya Haraprasād
           ↪ Shāstri</editor>
           <publisher>The Asiatic Society</publisher>
           <pubPlace>Calcutta</pubPlace>
           <date>1910</date>
         </bibl>
     </witness>
   </listWit>
  </sourceDesc>
</fileDesc>
<encodingDesc>
  <p>
```

```
    <list>
     <item>In the source file, there were two types of line breaks: returns
      ↪  (and possible surrounding space) and hyphens+returns. These
      ↪  were replaced with lb-elements. The ed-attribute "tha" refers
      ↪  to <ref target="#avaya-thakur-book">Thakur's 1974
      ↪  edition</ref>.</item>
      <item>The folio numbers were encoded as pb-elements with the
      ↪  ed-attribute "msR", which refers to the <ref
      ↪  target="#avaya-msR">manuscript used by
      ↪  Thakur</ref>.</item>
      <item>Additions in square brackets were enclosed in a
      ↪  supplied-element.</item>
      <item>Underlined items were enclosed in a &lt;hi
      ↪  rend="underline"&gt;.</item>
     <item>In the note-elements the &lt;lb&gt;s were removed.</item>
      <item>The footnotes were encoded as note-elements with their
      ↪  corresponding n-attribute. The footnote references were
      ↪  replaced by the note-elements.</item>
    </list>
   </p>
   <p xml:id="avaya-fn">There was no footnote reference for note 2 on
   ↪  page 6. Hence it was given the attribute place="bottom".</p>
  </encodingDesc>
  <profileDesc><!-- ... --></profileDesc>
  <revisionDesc>
   <change who="https://viaf.org/viaf/308710472/"
   ↪  when="2016-05-31">Replaced &lt;add&gt; with &lt;supplied&gt;
   ↪  and updated the encoding description.</change>
   <change who="https://viaf.org/viaf/308710472/"
   ↪  when="2017-03-25">For a complete history of the changes in this
   ↪  file go to <ref target="https://github.com/sarit/SARIT-
   ↪  corpus/commits/master/avayavinirakarana.xml">SARIT GitHub
   ↪  Repository</ref>.</change>
  </revisionDesc>
</teiHeader>
```